प्रस्तकूर्च्चं च निःक्षिप्य चषकं सफलाक्षतम् ।
पिधाय कुम्भवक्त्रञ्च क्षौमेणाच्छादयेत् पुनः ॥
चम्पा नत्वा ततः साध्यं तत्रानीय सुहृद्वृतम् ।
नदनत्सु पञ्चवाद्येषु मुहूर्त्ते शोभने सुधीः ॥
अभिषिञ्चेन्महाकार्य्यैर्यजमानञ्च साधकः ।
सुमङ्गलाभिर्नारीभिः क्षिप्तपुष्पाक्षताञ्चितम् ॥
अर्च्चितानां द्विजातीनामाशीर्व्वादपुरःसरम् ।
करेणास्य शिरः स्पृष्ट्वा प्रयुञ्जीताशिषं पुनः ॥
भद्रमस्तु शिवञ्चास्तु महामाया प्रसीदतु ।
रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्व्वदा ॥
अथोत्थायाभिषिक्तः सन् तोषयेद्ब्राह्मणान्
धनैः ।
एवञ्चेद्यजमानस्य शान्तिर्भवति निश्चदा ॥
प्रसङ्गाद्बलिविघ्नस्य शान्तिकर्म्म निरूपितम् ।
सर्व्वसम्पत्करं पुंसां सर्व्वसौभाग्यसिद्धिदम् ।
भूते च दुर्निमित्तादावप्येवं शान्तिमाचरेत् ॥”
इति निबन्धन्तोक्तबलिविघ्नशान्तिसंग्रहः ॥*॥
अन्यच्च ।
“एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयाद्दातुर्व्वा च्छेत्तुरेव
वा ॥”
प्रायश्चित्तमाह ।
“हन्यादेकप्रहारेण अन्यथा दोषमावहेत् ।
तच्छान्तये जपेद्विद्यां दुर्गाबीजसहस्रकम् ।
सहस्रं जुहुयाद्देव्ये प्रदद्यात् स्वर्णमाषकम् ॥”
इति कृत्यमहार्णवे वाचस्पतिमिश्रैरुक्तम् ॥*॥
अपरञ्च कालिकापुराणे ।
“चन्द्रहासेन कर्त्तारैश्छेदनं मुख्यमिष्यते ।
हस्तेन च्छेदयेद्यस्तु शोणितं साधकः पशुम् ।
पक्षिणं वाथ राजेन्द्र ! ब्रह्महत्यामवाप्नुयात् ॥”
मत्स्यसूक्ते ।
“छेदयेत्तीक्ष्णखड्गेन प्रहारेण सकृद्बुधः ॥”
इति दुर्गोत्सवतत्त्वम् ॥
पश्वादिबलिदानविधिर्यथा,—
“बलिदानविधानञ्च श्रूयतां मुनिसत्तम ! ।
मायातिं महिषं छागं दद्यान्मेषादिकन्तथा ॥
सहस्रवर्षं सा प्रीता दुर्गा मायातिदानतः ।
महिषेण वर्षशतं दशवर्षञ्च छागलात् ॥
वर्षमेकेन कुष्माण्डैः पक्षिभिर्हरिणैस्तथा ।
दशवर्षं कृष्णसारैः सहस्राब्दञ्च गण्डकैः ॥
कृत्रिमैः पिष्टनिर्म्माणैः षण्मासं पशुभिस्तथा ।
मासं सुशाखादिफलैरक्षतैरिति नारद ! ॥
युवकं व्याधिहीनञ्च सदङ्गं लक्षणान्वितम् ।
विशुद्धमविकाराङ्गं सुवर्णं पुष्टमेव च ॥
शिशुना बलिना दातुर्हन्ति पुत्त्रञ्च चण्डिका ।
वृद्धेनैव गुरुजनं कृशेन बान्धवन्तथा ॥
कुलञ्चैवाधिकाङ्गेन हीनाङ्गेन प्रजान्तथा ।
कामिनीं शृङ्गभङ्गेन काणेन भ्रातरन्तथा ॥
घण्टिकेन भवेन्मृत्युर्विघ्नञ्च छिन्नमस्तके ।
मृतं मित्रं ताम्रपृष्ठे भ्रष्टश्रीः पुच्छहीनके ॥
मायातीनाञ्च निर्णीतं श्रूयतां मुनिसत्तम ! ।
वक्ष्याम्यथर्व्ववेदोक्तं फलहानिर्व्यतिक्रमे ॥”*॥

अथ नरबलिः ।
“पितृमातृविहीनञ्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिकं विशुद्धञ्च सच्छूद्रं मूलकं वरम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मी संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा चरद्वारेण यत्नतः ।
वर्षान्ते च समुत्सृज्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥”*॥
अपि च ।
“सप्तम्यां पूजनं कृत्वा बलिं दद्याद्विचक्षणः ।
अष्टम्यां पूजनं शस्तं बलिदानविवर्ज्जितम् ॥
अष्टम्यां बलिदानेन विपत्तिर्जायते ध्रुवम् ।
दद्याद्विचक्षणो भक्त्या नवम्यां विधिवद्बलिम् ॥
बलिदानेन विप्रेन्द्र ! दुर्गाप्रीतिर्भवेन्नृणाम् ।
हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः ॥
उत्सर्गकर्त्ता दाता च च्छेत्ता पोष्टा च रक्षकः ।
अग्रपश्चान्निरोद्धा च सप्तैते वधभागिनः ॥
योऽयं हन्ति स तं हन्ति चेति वेदोक्तमेव च ।
कुर्व्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे।६१-६२। अध्यायौ ॥
श्रीभगवानुवाच ।
“क्रमन्तु बलिदानस्य स्वरूपं रुधिरादिभिः ।
यथा स्यात् प्रीतये सम्यक् तथा वक्ष्यामि
पुत्त्रकौ ॥
वैष्णवीतन्त्रकल्पोक्तः क्रमः सर्व्वत्र सर्व्वदा ।
साधकैर्व्वलिदानेषु ग्राह्यः सर्व्वसुरस्य तु ॥
पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः ।
महिषो गोधिका गावश्छागो बभ्रुश्च शूकरः ॥
खड्गश्च कृष्णसारश्च गोधिका सरभो हरिः ।
शार्द्दूलश्च नरश्चैव स्वगात्ररुधिरन्तथा ।
चण्डिकाभैरवादीनां बलयः परिकीर्त्तिताः ॥
बलिभिः साध्यते मुक्तिं बलिभिः साध्यते दिवम् ।
बलिदानेन सततं जयेत् शत्रून् नृपान् नृपः ॥*॥
मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा ।
मासैकन्तृप्तिमायाति ग्राहैर्मासांस्तु त्रीनथ ॥
मृगाणां शोणितैर्देवी नराणामपि शोणितैः ।
अष्टौ मासानवाप्नोति तृप्तिं कल्याणदा च सा ॥
गोगोधिकानां रुधिरैर्व्वार्षिकीं तृप्तिमाप्नुयात् ॥
कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः ।
आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीम् ॥
अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम् ।
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम् ।
तृप्तिमाप्नोति परमां शार्द्दूलरुधिरैस्तथा ॥
सिंहस्य सरभस्याथ स्वगात्रस्य च शोणितैः ।
देवी तृप्तिमवाप्नोति सहस्रं परिवत्सरान् ॥
मांसैरपि तथा प्रीती रुधिरैर्यस्य यावती ॥
कृष्णसारन्तते खड्गं तथा मत्स्यञ्च रोहितम् ।
वार्द्धीनसयुगञ्चापि फलं तेषां पृथक् शृणु ॥*॥
कृष्णसारस्य मांसेन तथा खड्गेन चण्डिका ।
वर्षान् पञ्चशतान्येव तृप्तिमाप्नोति केवलाम् ॥
रोहितस्य तु मत्स्यस्य मांसैर्वार्द्धीनसस्य च ।
तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया ॥
त्रिःपिबंस्त्विन्द्रियक्षीणः श्वेतो वृद्धस्त्वजापतिः ।
वार्द्धीनसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्कृतः ॥
नीलग्रीवो रक्तशीर्षः कृष्णपादः शितच्छदः ।
वार्द्धीनसः स्यात् पक्षीशो मम विष्णोरतिप्रियः ॥
नरेण बलिना देवी सहस्रं परिवत्सरान् ।
विधिदत्तेन चाप्नोति तृप्तिं लक्षं त्रिभिर्नरैः ॥
नारेणैवाथ मांसेन त्रिसहस्राणि वत्सरान् ।
तृप्तिं प्राप्नोति कामाख्या भैरवी मम रूपधृक् ॥
मन्त्रपूतं शोणितन्तु पीयूषं जायते सदा ।
मस्तकञ्चापि तस्यात्ति मांसञ्चापि सदा शिवा ॥
तस्मात्तु पूजने दद्याद्बलेः शीर्षञ्च लोहितम् ।
भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः ॥
पूजासु नाम मांसानि दद्याद्वै साधकः क्वचित् ।
ऋते तु लोहितं शीर्षममृतं तत्तु जायते ॥*॥
कुष्माण्डमिक्षुदण्डञ्च मद्यमासवमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा ॥
चन्द्रहासेन कर्त्र्या वा छेदनं मुख्यमिष्यते ।
दात्रासिधेनुक्रकचसङ्कुलाभिस्तु मध्यमम् ।
क्षुरक्षुरप्रभल्लैश्चैवाधमं परिकीर्त्तितम् ॥
एभ्योऽन्यैः शक्तिबाणाद्यैर्बलिश्छेद्यः कदापि न ।
नाश्नाति देवी बलिं तन्तु दाता मृत्युमवाप्नुयात् ॥
हस्तेन छेदयेद्यस्तु शोणितं साधकः पशुम् ।
पक्षिणं वा ब्रह्महत्यां सोऽवाप्नोति सुदुःसहाम् ।
नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः ॥
खड्गस्यामन्त्रणे मन्त्रा यावन्तः कथिताः पुरा ।
महामायाबलौ ते वै योज्यास्तत्रोदिता बुधैः ॥
तैः सार्द्धमेते मन्त्रास्तु योज्याः खड्गाभिमन्त्रणे ।
पूजने शारदादीनां कामाख्याया विशेषतः ॥
ह्रिः कालीति ततो देया वज्रेश्वरिपदन्तथा ।
ततोऽनु लौहदण्डायै नमः शेषे तु योजयेत् ॥
संपूज्यानेन मन्त्रेण खड्गमादाय पाणिना ।
कालरात्र्यास्तु मन्त्रेण तं खड्गमभिमन्त्रयेत् ॥
नेत्रबीजस्य मध्यन्तु द्विरावृत्य प्रयोजयेत् ।
ततोऽनु कालीति विकटदंष्ट्रेऽनु तत्पदम् ॥
हान्तादीनां तृतीयेन स्वरेणैकारंशेन च ।
योजितो नादबिन्दुभ्यां द्वौ तत्पश्चान्नियोजयेत् ॥
फेत्कारिणिपदं तस्मात् खादय छेदयेति च ।
सर्व्वदुष्टानिति ततो ह्रिमारय सुलापकम् ॥
खड्गेन छिन्धि च्छिन्धीति ततः किल किलेति
वै ।
ततश्चिकि चिकीत्येव ततः पिब पिबेति च ॥
ततोऽनु रुधिरश्चैव स्फौं स्फौं किरि किरीति च ।
कालिकायै नम इति कालरात्र्यास्तु मन्त्रकम् ॥
इत्यनेन तु मन्त्रेण करवालेऽभिमन्त्रिते ।
कालरात्रिः स्वयं तस्मिन् प्रसीदत्यरिहानये ॥*॥
बलेः पूर्व्वोदिता मन्त्रा नित्यं ग्राह्यास्तु साधकैः ।
अयं मन्त्रस्तु वक्तव्यस्तस्य हत्याविहानये ॥
यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥